॥ ओ३म् ॥
॥ कृण्वन्तो विश्वमार्यम् ॥
(विश्वको आर्य – 'संस्कारी' बनायें)
साप्ताहिक सत्संगो के लिये

प्रार्थना पुस्तक

(सार्वदेशिक धर्मार्य सभा से प्रमाणित)

સાર્વદેશિક ધર્માર્ય સભાના પ્રતિષ્ઠિત આર્ય વિદ્વાનોએ વર્ષો નિરંતર પરિશ્રમ કરી, મહર્ષિ દયાનંદજીએ નિર્દિષ્ટ કરેલ યજ્ઞ પર વિચાર કરી, યજ્ઞની પદ્ધતિઓનું સંકલન કરેલ છે.

આ પુસ્તકમાં આર્યોએ પ્રતિદિન કરવાના પ્રાતઃજાગરણ, સન્ધ્યા, સામાન્ય દૈનિક યજ્ઞ તથા બૃહદ્ યજ્ઞ, રાષ્ટ્રીય પ્રાર્થના, સંગઠન સૂક્તના મંત્રો તથા સાપ્તાહિક સત્સંગોમાં ઉપયોગી પ્રાર્થનાગાન, ભજન આદિ આપેલ છે.

સમગ્ર ભારતમાં એકસૂત્રતા જળવાઈ રહે તે માટે સાર્વદેશિક ધર્માર્ય સભાએ નકકી કરેલ ક્રમ અનુસાર આ પુસ્તક પ્રકટ કરવામાં આવેલ છે.

આ પુસ્તકની આ સુધારેલી ૧૦ મી આવૃતિ 'આર્યસમાજ જામનગર' દ્વારા પ્રસિદ્ધ થાય છે.

આ પુસ્તકના પ્રુફ રીડીંગ માટે આર્ય સમાજ-જામનગરના નિમંત્રિત અંતરંગ સદસ્ય શ્રીમતી નિમુબેન મહેશભાઈ રામાણી અને શ્રી મિન્ટુબેન ચોવટીયા એ મદદ કરેલ છે.

દીપક જયંતિલાલ ઠક્કર
પ્રમુખ : આર્યસમાજ અને આર્યવિદ્યાસભા - જામનગર.

મહેશ ભાણજીભાઈ રામાણી
માનદ્ મંત્રી : આર્યસમાજ અને આર્યવિદ્યાસભા - જામનગર.

प्रकाशक
आर्य विद्या सभा – आर्यसमाज जामनगर

२०२० ई.स. પ્રત : ૧૦,૦૦૦ - માર્ચ-જુન - ૨૦૨૦ मूल्य : २०.००

॥ ओ३म् ॥

આર્યસમાજ જામનગર દ્વારા સંચાલિત
વિવિધ પ્રવૃત્તિઓ

૧. દૈનિક યજ્ઞ - સવારે અને સાંજે
૨. સાપ્તાહિક સત્સંગ - રવિવાર સવારે ૮.૩૦ કલાકે
૩. પારિવારિક સત્સંગ
૪. વાર્ષિકોત્સવ
૫. વૈદિક સંસ્કાર પ્રચાર - માનવજીવન વિકાસ અર્થે ૧૬ વૈદિક સંસ્કાર અને વિવિધ ધાર્મિક કર્મકાંડ સંપૂર્ણ વૈદિક પધ્ધતિથી કરાવવાની વ્યવસ્થા.
૬. નિઃશુલ્ક ઔષધાલય તથા એક્યુપ્રેશર નિદાન કેન્દ્ર
૭. સાર્વજનિક વાંચનાલય
૮. આર્ય સાહિત્ય તથા હવન સામગ્રી વિક્રય વિભાગ
૯. કન્યા કેળવણી-શ્રીમદ્ દયાનંદ કન્યા વિદ્યાલય બાલમંદિર થી ધો. ૧૨.
૧૦. રોગ નિદાન કેમ્પોનું આયોજન.
૧૧. ગરીબ પરિવારોમાં સમય-સમય પર અનાજ, કપડાં ઈત્યાદિ જીવન જરૂરીયાતની વસ્તુઓનું વિતરણ.
૧૨. આર્યસમાજ મંદિરમાં વૈદિક તથા રાષ્ટ્રીય (પર્વ) તહેવારો ઉજવવામાં આવે છે. જેવા કે, (૧) મકર સંક્રાન્તિ (૨) ગણતંત્ર દિવસ (૩) વસંત પંચમી (૪) મહર્ષિ દયાનંદ જન્મ દિવસ (૫) જ્યોતિ પર્વ (શિવરાત્રી બોધોત્સવ) (૬) પંડિતવીર લેખારામતૃતીયા (૭) મિલન પર્વ (હોળી) (૮) આર્ય સમાજ સ્થાપના દિવસ (૯) રામ નવમી (૧૦) શ્રાવણી ઉપાકર્મ (રક્ષાબંધન) (૧૧) શ્રી કૃષ્ણ જન્માષ્ટમી (૧૨) સ્વતંત્રતા દિવસ (૧૩) વિજ્યાદશમી (દશેરા) (૧૪) મહર્ષિ દયાનંદ સરસ્વતિ નિર્વાણ દિવસ (દિપાવલી) (૧૪) બલિદાન પર્વ (સ્વામી શ્રધ્ધાનંદ બલિદાન દિવસ)
૧૩. આર્યવીર તથા વીરાંગના દલ
૧૪. વેબસાઇટ દ્વારા વેદ પ્રચાર
૧૫. મેડીકલ સાધન સહાય

પ્રાત : જાગરણના મંત્રો

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥
– ऋग्वेद ७। ४१। १

अर्थ – (प्रातः) प्रभात समय में (अग्निम्) स्वप्रकाश – स्वरूप (प्रातः) (इन्द्रम्) परमैश्वर्य के दाता और परमैश्वर्ययुक्त (प्रातः) (मित्रावरुणा) प्राण उदान के समान प्रिय और सर्वशक्तिमान् (प्रातः) (अश्विना) सूर्य चन्द्र जिसने उत्पन्न किये हैं, उस परमात्मा की (हवामहे) स्तुति करते हैं और (प्रातः) (भगम्) भजनीय, सेवनीय, ऐश्वर्ययुक्त (पूषणम्) पुष्टिकर्ता (ब्रह्मणस्पतिम्)अपने उपासक वेद और ब्रह्माण्ड के पालन करनेहारे (प्रातः) (सोमम्) अन्तर्यामी प्रेरक (उत) और (रुद्रम्) पापियों को रुलानेहारे और सर्वरोगनाशक जगदीश्वर की (हुवेम) स्तुति प्रार्थना करते हैं।

ભાવાર્થ : પ્રાત : કાળે ઈશ્વરની ઉપાસના, અગ્નિહોત્ર, પ્રાણાયામ દ્વારા પાન અને અપાનની પુષ્ટિ દ્વારા માતા, પિતા, અધ્યાપક ઉપદેશક આદિ વિદ્વાનોને પ્રણામ, માન અને વેદોનો અભ્યાસ કરવો જોઈએ

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥
– ऋग्वेद ७। ४१। २

अर्थ – (प्रातः) पाँच घड़ी रात्रि रहे (जितम्) जयशील (भगम्) ऐश्वर्य के दाता (उग्रम्) तेजस्वी (अदितेः) अन्तरिक्ष के (पुत्रम्) सूर्य की उत्पत्ति करने और (यः) जो कि सूर्यादि लोकों को (विधर्त्ता) विशेष करके धारण करनेहारा (आध्रः)

सब ओर से धारणकर्ता (यं चित्) जिस किसी का भी (मन्यमानः) जाननेहारा (तुरश्चित्) दुष्टों का भी दण्डदाता और (राजा) सबका प्रकाशक है। (यं) जिस (भगम्) भजनीय स्वरूप को (चित्) भी (भक्षीति) इस प्रकार सेवन करता है, कि तुम, जो मैं सूर्यादि जगत् का बनाने और धारण करनेहारा हूँ, उस मेरी उपासना को किया करो और मेरी आज्ञा में चला करो, इससे (वयम्) हम उसकी (हुवेम) स्तुति करते हैं।

ભાવાર્થ : સદા પ્રાતઃકાળથી યથાશક્તિ-સામર્થ્ય વિદ્યા પ્રાપ્તિ અને પુરુષાર્થ થી ઐશ્વર્યને ઉત્પન્ન કરી આનંદનો ઉપભોગ કરી ઈશ્વરની આજ્ઞા પ્રમાણે ચાલીએ.

भग प्रणे॑तु॒र्भग स॒त्यरा॑धो॒ भगे॒मां धिय॒मुद॑वा॒ दद॑न्नः ।
भग॒ प्र णो॑ जनय॒ गोभि॒रश्वै॒र्भग॒ प्र नृभि॑र्नृ॒वन्त॑ः स्याम ॥

– ऋग्वेद ७।४१।३

अर्थ – हे (भग) भजनीयस्वरूप ! (प्रणेतः) सबके उत्पादक सत्याचार में प्रेरक (भग) ऐश्वर्यप्रद (सत्यराधः) सत्यधन के देनेहारे (भग) धर्मात्माओं के ऐश्वर्यदाता, (नः) हमको (इदम्) इस (धियम्) प्रज्ञा को (ददत्) दीजिये, और उनके दान से हमारी (उदव) रक्षा कीजिये। हे (भग), आप (गोभिः) गाय आदि (अश्वैः) घोड़े आदि उत्तम पशुओं के योग से राज्य श्री को (नः) हमारे लिए (प्रजनय) प्रकट कीजिये। हे (भग), आपकी कृपा से हम लोग (नृभिः) उत्तम मनुष्यों से (नृवन्तः) बहुत वीर मनुष्यों वाले (प्रस्याम) अच्छे प्रकार होवें।

ભાવાર્થ : સર્વ ઉત્પાદક, સત્યધનને દેનાર, સત્યાચરણ કરનારને આશ્રય આપનાર હે પરમેશ્વર, અમને પ્રજ્ઞા આપો અને અમારી રક્ષા કરો. આપની કૃપાથી અમો ઉત્તમ વીર મનુષ્ય બનીએ.

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥
– ऋग्वेद ७।४१।४

अर्थ – हे भगवन् ! आपकी कृपा (उत) और अपने पुरुषार्थ से हम लोग (इदानीम्) इसी समय (प्रपित्वे) प्रकर्षता व उत्तमता की प्राप्ति में (उत) और (अह्नाम्) इन दिनों के मध्य में (भगवन्तः) ऐश्वर्ययुक्त शक्तिमान् (श्याम) होवें, (उत) और हे (मघवन) परमपूजित असंख्यधन देनेहारे । (सूर्यस्य) सूर्यलोक के (उदिता) उदय में (देवानां) पूर्ण विद्वान् धार्मिक आप्त लोगों की (सुमतौ) अच्छी उत्तम प्रज्ञा (उत) और सुमति में (वयम्) हम लोग (स्याम) सदा प्रवृत्त रहें।

ભાવાર્થ : હે ભગવન્ ! આપની કૃપાથી અને અમારા પુરુષાર્થથી અમે ઉત્તમતા પામીએ ઐશ્વર્યયુકત અને શકિતશાલી બનીએ સૂર્યલોકના ઉદયમાં પૂર્ણ વિદ્વાન, ઉત્તમ, પ્રજ્ઞાવાળા અને સુમતિમાં સદા પ્રવૃત્ત રહીએ.


भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति, स नो भग पुरएता भवेह ॥
– ऋग्वेद ७।४१।५

अर्थ – हे (भग) सकलैश्वर्य सम्पन्न जगदीश्वर ! जिसमें (तम्) उस (त्वा) आपकी (सर्वः) सब सज्जन (इतजोहवीति) निश्चय करके प्रशंसा करते हैं, (सः) सो आप हे (भग) ऐश्वर्यप्रद ! (इह) इस संसार और (नः) हमारे गृहाश्रम में (पुरः एता) अग्रगामी और आगे – आगे सत्यकर्मो में बढ़ानेहारे (भव) हूजिए, जिससे (भग : एव) सम्पूर्ण ऐश्वर्ययुक्त और समस्त ऐशवर्य के दाता होने से आप ही हमारे (भगवन्)

पूजनीय देव (अस्तु) हूजिए, (तेन) इसी हेतु से (देवाः वयम्) हम विद्वान् लोग (भगवन्तः) सकलैश्वर्य सम्पन्न होके सब संसार के उपकार में, तन, मन, धन से प्रवृत्त (स्याम) होवें ।

ભાવાર્થ : હે સકલ ઐશ્વર્યસમ્પન્ન જગદીશ્વર ! આપ અમારા સંસારમાં અગ્રગામી અને અમારા પૂજનીય થાઓ, જેથી અમો સકળ ઐશ્વર્ય પ્રાપ્ત કરી જગતના ઉપકારમાં તન, મન, અને ધનથી પ્રવૃત્ત થઈએ.

ओ३म् शान्तिः! शान्तिः! शान्तिः!



१. અથ સંધ્યા - બ્રહ્મયજ્ઞઃ

સન્ધ્યાની શરૂઆતમાં ગાયત્રી મંત્રનો પાઠ કરી શિખા બાંધી રક્ષા કરવી.

गायत्री मन्त्रः

ओ३म् । भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ - यजुः० ३६।३

(सवितुः) जो सब जगत् का उत्पन्न करनेहारा और ऐश्वर्य को देनेवाला है (देवस्य) जो सबके आत्माओं का प्रकाश करनेवाला और सुखों का दाता है (वरेण्यम्) जो अत्यन्त ग्रहण करने योग्य (भर्गः) शुद्ध विज्ञानस्वरूप है। (तत्) उसको (धीमहि) हम लोग सदा प्रेम भक्ति से निश्चय करके अपने आत्मा में धारण करें। किस प्रयोजन के लिये ? कि (यः) जो पूर्वोक्त सविता देव परमेश्वर है वह (नः) हमारी (धियः) बुद्धियों को (प्रचोदयात्) कृपा करके सब बुरे कर्मों से अलग करके सदा उत्तम कामों में प्रवृत करें -

भावार्थ - हे प्रभु ! आप सत् चित् आनन्दस्वरूप प्राणदाता दुःखनाशक सुखस्वरूप हैं। आप संसार के रचयिता हैं और ग्रहण करने योग्य हमारे परम देव हैं।

हे देव ! हम आपके सत्यज्ञानस्वरूप तेज को धारण करें जो हमारी बुद्धियों को शुद्ध पवित्र कर शुभ कर्मों में प्रेरित करें।

ભાવાર્થ : હે પ્રભુ ! આપ સત્, ચિત્, આનંદસ્વરૂપ પ્રાણદાતા, દુઃખનાશક, સુખસ્વરૂપ છો. આપ સંસારના રચયિતા છો અને ગ્રહણ કરવા યોગ્ય અમારા પરમ દેવ છો. હે દેવ ! અમે આપના સત્યજ્ઞાનસ્વરૂપ તેજને ધારણ કરીએ જે અમારી બુદ્ધિને શુદ્ધ પવિત્ર કરી શુભ કર્મોમાં પ્રેરિત કરે.

अथाचमन मन्त्रः

ओं शन्नों देवीरभिष्टयऽआपों भवन्तु पीतयें । शँयोरभिस्त्रंवन्तु नः ॥ - यजु : ० ३६ । १२

ભાવાર્થ : હે સર્વનાશક પરમાત્મા, આ (देवीः) દિવ્ય (आपः) જલ (अभिष्टये) સારી ઈચ્છા પૂર્ણ કરવાવાળું, (पीतये) સંતોષ આપનારું અને (शम्) કલ્યાણકારી થાઓ અને (नः) અમારી ઉપર (शंयो) કલ્યાણની (अभिस्त्रवन्तु) અભિવૃષ્ટિ કરનારું થાઓ.

अथ अङ्गस्पर्श

નીચેના મંત્રથી અંગસ્પર્શ કરવો. (ડાબા હાથમાં જલ લઈ જમણા હાથની ટચલીની બાજુની (અનામિકા) અને વચલી (મદયમા) આંગળીથી સ્પર્શ કરવો.)

ओं वाक् वाक् ।	હે ઈશ્વર, અમારી વાણીશક્તિ અને વાણીને બળવાન બનાવો.
ओं प्राणः प्राणः ।	હે ઈશ્વર, અમારી પ્રાણશક્તિ અને પ્રાણને બળવાન બનાવો.
ओं चक्षुः चक्षुः ।	હે ઈશ્વર, અમારી દષ્ટિ અને નેત્રને બળવાન બનાવો.
ओं क्षोत्रं श्रोत्रम् ।	હે ઈશ્વર, અમારી શ્રવણશક્તિ અને કાનોને બળવાન બનાવો.
ओं नाभि : ।	હે ઈશ્વર, અમારી નાભિને બળવાન બનાવો.
ओं हृदयम् ।	હે ઈશ્વર, અમારા હૃદયને બળવાન બનાવો.
ओं कण्ठः ।	હે ઈશ્વર, અમારા કંઠને બળવાન બનાવો.

ओं शिरः । — હે ઈશ્વર, અમારા મસ્તકને બળવાન બનાવો.

ओं बाहुभ्यां यशोबलम् । — હે ઈશ્વર, અમારી ભુજાઓને યશસ્વી અને બળવાન બનાવો.

ओं करतलकरपृष्ठे । — હે ઈશ્વર, અમારી હથેળી અને હાથની પીઠને મજબૂત બનાવો.

अथ मार्जन मन्त्राः

(નીચેના મંત્રથી બીજી અને વચલી આંગળીઓથી જલ છાંટવું)

ओं भूः पुनातु शिरसि । — હે સર્વરક્ષક પરમેશ્વર, તમે અમારા મસ્તકને પવિત્ર રાખો.

ओं भुव : पुनातु नेत्रयोः । — હે દુઃખવિનાશક પરમાત્મા, અમારી આંખોને પવિત્ર રાખો.

ओं स्वः पुनातु कण्ठे । — હે સુખસ્વરૂપ પરમાત્મા, અમારા કંઠને પવિત્ર રાખો.

ओं महः पुनातु हृदये । — હે સર્વથી મહાન પરમેશ્વર, અમારા હૃદયને પવિત્ર રાખો.

ओं जनः पुनातु नाभ्याम् । — હે સર્વના ઉત્પાદક પિતા, અમારી નાભિને પવિત્ર રાખો.

ओं तपः पुनातु पादयो : । — હે દણ્ડદાતા પરમેશ્વર, અમારા પગને પવિત્ર રાખો.

ओं सत्यं पुनातु पुनः शिरसि । — હે સત્યસ્વરૂપ પરમેશ્વર, અમારી વારંવાર પ્રાર્થના છે કે અમારા મસ્તકને પવિત્ર રાખો.

ओं खं ब्रह्म पुनातु सर्वत्र ।

હે સર્વવ્યાપક પરમેશ્વર, અમારાં સર્વ અંગોને સર્વદા, સર્વથા પવિત્ર રાખો.

अथ प्राणायाम मन्त्रा :

નીચેના મંત્રથી પ્રાણાયામ કરવા.

ओं भूः। ओं भुवः । ओं स्वः । ओं महः । ओं जनः । ओं तपः। ओं सत्यम्।

ભાવાર્થ : હે સર્વરક્ષક પરમપિતા, આપ (भूः) પ્રાણોના પ્રાણ (भुवः) દુઃખ વિનાશક, (स्वः) સુખ સ્વરૂપ, (महः) સર્વથી મોટા (जनः) સર્વના ઉત્પાદક (तपः) દંડ દેવાવાળા (सत्यम्) સદૈવ સત્યસ્વરૂપ છો. હે પરમપિતા, અમો આપનું સદા ચિંતન કરીએ.

अथाघमर्षणमन्त्रा :

ओम् । ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रोऽअर्णवः ॥ १ ॥

– ऋ० १० । १९० । १

ભાવાર્થ : હે પરમેશ્વર, (ऋतं) વેદ અને (सत्यं च) સત્ય પ્રકૃત્તિ (પૃથ્વી, જલ, આકાશ, અગ્નિ, વાયુ) (अभिद्धात् तपसः) આપના અત્યંત સામર્થ્ય થી આપ પૂર્ણ પ્રકાશમાન પ્રભુએ જ (अध्याजायत) રચેલ છે. (ततः) આપે જ (रात्री) પ્રલય અને (समुद्रो) મેઘમંડલ તથા (अर्णवः) સમુદ્ર આદિ (अजायत) બનાવેલ છે.

समुद्रादर्णवादधि संवत्सरोऽअजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥

– ऋ० १० । १९० । २

ભાવાર્થ : હે પરમેશ્વર, (समुद्रात् अर्णवात् अधि) મેઘ મંડલ તથા સમુદ્ર બનાવ્યા પછી (अहोरात्राणि) દિન અને રાત આદિ (विदधत्) બનાવ્યાં. બાદ આપે (संवत्सरः) કાળ વિભાગ (अजायत) ઉત્પન્ન કર્યા. આપ (मिषतः) સહજ સ્વભાવથી (विश्वस्य) સારા જગતને (वशी) આપના વશમાં રાખનાર છો.

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥ ३ ॥

– ऋ० १० । १९० । ३

ભાવાર્થ : હે ઈશ્વર, (यथापूर्वम्) જે રીતે અગાઉ સૃષ્ટિના આરંભમાં બનાવ્યાં હતા તેમ (सूर्याचन्द्रमसौ) સૂર્ય, ચંદ્ર, (दिवञ्च) દ્યુલોક (पृथ्वीञ्च) પૃથ્વીલોક અને (अन्तरिक्षम्) અંતરિક્ષ તથા (स्वः) સર્વલોકલોકાન્તરો ને ઉત્પન્ન કરનારા (धाता) આપ છો.

अथ आचमन मन्त्रः

નીચેના મન્ત્રથી ત્રણ આચમન કરવાં.

ओं शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥ – यजुः ० ३६ । १२

(આ મન્ત્રનો અર્થ અગાઉ આવી ગયો છે.)

अथ मनसापरिक्रमा – मन्त्राः

ओम् । प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः । तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥१ ॥

– अर्थव ० ३ । २७ । १

(प्राची) પૂર્વ (दिग्) દિશાના (अधिपतिः) અધિપતિ (अग्निः) પ્રકાશસ્વરૂપ (असित्) સર્વ બંધન રહિત (रक्षिता)

સર્વપ્રકારે રક્ષણ કરવાવાળા, (आदित्याः इषवः) જેના બાણ આદિત્યનાં કિરણો છે (तेभ्यो......... अस्तु) એવા હે પરમેશ્વર, અમે તમને વારંવાર વંદન કરીએ છીએ. (योअस्मान्) હે પ્રભુ, જે કોઇ અમારી સાથે (द्वेष्टि) દ્વેષ રાખે છે અથવા (यं) જેની સાથે (वयं) અમે (द्विष्मः तं) દ્વેષ કરીએ છીએ તેને (वः) આપને (जम्भे) હવાલે (दध्मः) કરીએ છીએ.

ભાવાર્થ : હે પૂર્વ દિશામાં વિરાજમાન પરમેશ્વર, અમોને વેદના જ્ઞાન દ્વારા લાભ થાય અને અમારે કોઇથી વેર ન હો.

दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥२ ॥ – अथर्व ० ३ । २७ । २

(दक्षिणा) દક્ષિણ (दिग्) દિશાના (इन्द्र अधिपति) ઐશ્વર્યવાળા અધિપતિ, (तिरश्चिराजी रक्षिता) જે પદાર્થ કીટ, પતંગ, વૃશ્ચિક આદિ તિર્યક પશુ પક્ષીની પેઠે વેદ વિરુદ્ધ ચાલવાવાળાની કુસંગરૂપી હાનિથી રક્ષા કરવાવાળા આપ છો. (पितर इषवः) જ્ઞાની મનુષ્યનાં ઉપદેશરૂપી બાણો દ્વારા (रक्षिता) અમારી રક્ષા કરો છો. (तेभ्यो) આગળનો અર્થ ઉપર આવી ગયેલ છે.

ભાવાર્થ : હે દક્ષિણ દિશાના અધિપતિ પરમેશ્વર, અમે જ્ઞાનીઓના ઉપદેશથી લાભ ઉઠાવીએ અને અમારો કોઇથી દ્વેષ ન હો.

प्रतीची दिग्वरुणोऽधिपतिः पृदाकू रक्षितान्नमिषवः । तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ३ ॥

– अथर्व ० ३ । २७ । ३

(प्रतीची) પશ્ચિમ (दिग्) દિશાના (अधिपतिः) અધિપતિ (वरुणः) ભજવા યોગ્ય (पृदाकू) વાઘ, વરુ, વીંછી, સાપ વગેરે વિષધારી જીવોથી (अन्नम्) અન્ન આદિ (इषवः) ઔષધિઓરૂપી બાણો અર્થાત્ અજ્ઞાનનાશક પ્રેરણાઓ દ્વારા (रक्षिता) રક્ષણ કરનાર હે ઈશ્વર, (तेभ्यो) (આગળનો મન્ત્રનો અર્થ ઉપર આવી ગઓ છે.)

ભાવાર્થ : હે પશ્ચિમની દિશામાં પણ વિરાજમાન જગદીશ્વર, અન્ન આદિ ઔષધિઓ અર્થાત્ અજ્ઞાનનાશક પ્રેરણાથી અમોને લાભ થાય. અમારે કોઈથી વેર ન હો.

उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिताशनि रिषवः । तेभ्यो नमोऽधिपतभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ४ ॥ – अथर्व ० ३ । २७ । ४

(उदीची) ઉત્તર (दिग्) દિશાના (अधिपतिः) અધિપતિ (सोमः) શાન્ત્યાદિ ગુણોથી આનંદ આપનાર (स्वजः) સ્વયં. પ્રકાશસ્વરૂપ (अशनिः) વીજળીના પ્રકાશરૂપી (इषवः) બાણો દ્વારા અમારી (रक्षिता) રક્ષા કરો છો, (तेभ्यो) (આગળનો મન્ત્રનો અર્થ ઉપર આવી ગઓ છે.)

અર્થ : ઉત્તર દિશાનો શાંતિ આપનાર ઈશ્વર સ્વામી છે. તે પોતે અજન્મા અને સર્વની રક્ષા કરનાર છે. વિદ્યુત તેના બાણની જેમ છે. તેમને અમારા નમસ્કાર થાઓ. જગતની રક્ષા કરનારને નમસ્કાર થાઓ. જે કોઈ અમારાથી દ્વેષ રાખે છે કે જેનાથી અમે દ્વેષ રાખીએ છીએ, તે દ્વેષને અમે આપ ઈશ્વરની ન્યાયરૂપી દાઢમાં મૂકીએ છીએ.

ध्रुवा दिग्विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥५॥ – अथर्व० ३।२७।५

(ध्रुवा) નીચેની (दिग्) દિશાના (अधिपतिः) અધિપતિ (विष्णुः) સર્વવ્યાપક પરમેશ્વર, આપ (कल्माषग्रीवः) નાના પ્રકારની કૃષ્ણ આદિ રંગોવાળી (वीरुध इषव) નીચેથી ઉપર જતી વનસ્પતિરૂપી (વેલ) બાણ દ્વારા અર્થાત્ ઉપર લઇ જવાની ભાવનાઓ દ્વારા (रक्षिता) અમારી રક્ષા કરો છો. (तेभ्यो) (આગળનો અર્થ ઉપર આવી ગયેલ છે.)

ભાવાર્થ : હે નીચેની દિશામાં પણ વિરાજમાન જગતસ્વામી, વનસ્પતિઓ અર્થાત્ ઉપર ઊઠવાવાળી વિવિધ ભાવનાઓ દ્વારા અમો લાભ ઉઠાવીએ અને અમારે કોઇથી વેર ન હો

ऊर्ध्वा दिग्बृहस्पतिरधिपतिः श्वित्रो रक्षिता वर्षमिषवः । तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ६ ॥ – अथर्व० ३।२७।६

(ऊर्ध्वा) ઉપરની (दिग्) દિશાના (अधिपतिः) અધિપતિ (बृहस्पतिः) પૂર્ણ વિદ્વાન પ્રભુ, આપ (श्वित्रः) અમારા આત્માની બૂરી વૃત્તિઓ અર્થાત્ શરીરને કોઢ આદિ મહાન રોગથી (वर्षमिषवः) જ્ઞાન અર્થાત્ જલની વર્ષારૂપી બાણો દ્વારા (रक्षिता) રક્ષા કરો છો. (तेभ्यो) (આગળનો મન્ત્રનો અર્થ ઉપર આવી ગયો છે.)

ભાવાર્થ : ઉપરની દિશામાં પણ વિરાજમાન હે પરમાત્મા, જ્ઞાન અર્થાત્ જલની વર્ષાથી અમોને લાભ થાય. અમારે કોઇથી વેર ન હો.

अथोपस्थानमन्त्राः

ओम्। उद्वयन्तमसस्परि स्वः पश्यन्तऽ उत्तरम्।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १ ॥
– यजु० ३५।१४

હે પરમેશ્વર, (तमसस्परिस्वः) સર્વ અંધકારથી અલગ પ્રકાશસ્વરૂપ (उत्तरम्) પ્રલય પછી પણ સદા વર્તમાન (देवं देवत्रा) દેવોના દેવ, (सूर्यम्) સર્વવ્યાપક (ज्योतिरुत्तमम्) પ્રકાશસ્વરૂપ, સર્વમાં ઉત્તમ, (पश्यन्तः) આપને માનીને (उद्वयं) અમો શ્રદ્ધાપૂર્વક આપને (अगन्तम्) પ્રાપ્ત કરીએ

ભાવાર્થ : હે પરમાત્મા, માતાની ગોદ સમાન અમોને આપનો આશ્રય મળે. અમો આપને શ્રદ્ધાથી પ્રાપ્ત કરીએ.

उदु त्यंजातवेदसन्देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम् ॥ २ ॥ – यजुः० ३३।३१

(उदुत्यं जातवेदसम्) જેનાથી ચારે વેદ પ્રસિદ્ધ થયા છે, જે પ્રકૃત્તિ આદિ સર્વ ભૂતોમાં વ્યાપ્ત છે, જે સર્વ જગતના ઉત્પાદક જાતવેદાઃ નામથી પ્રસિદ્ધ છે, (देवम्) જે સર્વ દેવોના દેવ (सूर्यम्) સર્વ જીવ આદિ જગતના પ્રકાશક છે, (त्यम्) તે પરમાત્માની (दृशे विश्वाय) વિશ્વવિદ્યાની પ્રાપ્તિને માટે અમો ઉપાસના કરીએ છીએ. અમોને શ્રદ્ધાપૂર્વક (केतवः) વેદ શ્રુતિઓનું (वहन्ति) જ્ઞાન કરવો.

ભાવાર્થ : હે પ્રભુ, અમોને 'વેદ' નું જ્ઞાન કરાવો.

चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवीऽअन्तरिक्षँ सूर्यऽआत्मा जगत-
स्तस्थुषश्च स्वाहा ॥ ३ ॥ – यजुः० ७।४२

(चित्रं देवानां) પ્રાણી અને જડ જગતના(सूर्य आत्मा) આત્મા જેને સૂર્ય કહેવામાં આવે છે, જેણે (द्यावा) દ્યુલોક (पृथिवी)

પૃથ્વીલોક (अन्तरिक्षँ॒) મધ્યસ્થ લોક આદિ (आप्रा) રચીને કાયમ (સ્થિર) કરેલ છે, (चक्षुर्मित्रस्य) જે મિત્ર અને પ્રકાશ કરનાર છે. (वरुणस्याग्ने) ભદ્ર મનુષ્યોમાં જે પ્રકાશ સમાન છે, જે (अनीकम्) શકિતમાન બળના ભંડાર છે તે પરમેશ્વર (उदगात्) અમારા હૃદયમાં યથાવત પ્રકાશિત રહે

ભાવાર્થ : હે રક્ષક પરમાત્મા, આપ જ સંસારના કર્તા, ધર્તા છો. આપ અમારા હૃદયમાં પ્રકાશિત રહો.

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शतँ॒ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ ४ ॥- यजुः ० ३६ । २४

હે ઇશ્વર, આપ (तच्चक्षुर्देवहितम्) વિદ્વાનોને કલ્યાણકારી રસ્તો બતાવો છો. (पुरस्ताच्छुक्रमुच्चरत) અને સદૈવ સત્યસ્વરૂપ છો. હે પરમેશ્વર, (जीवेम शरदः शतम्) સો વર્ષ જીવીને (पश्येम् शरदः शतम्) સો વર્ષ સુધી આપનું જ્ઞાન પ્રાપ્ત કરીએ અને સારા પદાર્થો જોતા રહીએ. (श्रृणुयाम शरदः शतम्) સો વર્ષ સુધી આપના ઉપદેશ આદિ સારી વાતો સાંભળતા રહીએ. (प्रब्रवाम शरदः शतम्) સો વર્ષ સુધી આપના ગુણગાન કરતા રહીએ (अदीनाः स्याम शरदः शतम्) સો વર્ષ સુધી સર્વ આધીનતાઓ અને રોગથી બચીને રહીએ તથા (भूयश्च शरदः शतात्) સો વર્ષથી પણ અધિક અમો આવા પ્રકારના કામ કરતા રહીને જીવીએ.

ભાવાર્થ : હે ઇશ્વર, અમો સારાં કર્મ કરતાં કરતાં નિરોગી રહીને સો વર્ષની જિંદગી વિતાવીએ.

નીચેના મન્ત્ર ત્રણ વખત બોલવો

अथ गायत्री – मन्त्रः

ओं भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ - यजु ० ३६ । ३

(આ મન્ત્રનો અર્થ અગાઉ આવી ગયો છે.)

अथ समर्पणम्

हे ईश्वर दयानिधे । भवत्कृपयानेन जपोपासना -
दिकर्मणा धर्मार्थकाममोक्षाणां सद्यः सिद्धिर्भवेन्नः ।

હે ઈશ્વર દયાનિધિ, આપની કૃપાથી અમે જે જે ઉત્તમ કામ કરીએ છીએ તે તે સર્વે આપને સમર્પણ કરીએ છીએ, જેથી અમો આપને પ્રાપ્ત કરીને ધર્મ અર્થાત્ સત્ય, અર્થ, કામ અને મોક્ષ પ્રાપ્ત કરીએ. (આ ચાર પદાર્થોની સિદ્ધિ અમોને શીઘ્ર પ્રાપ્ત થાઓ.)

नमस्कार - मन्त्रः

ओं नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

– यजु० १६।४१

હે પરમેશ્વર, આપ (शंभवाय) સુખદાતા છો અને (मयोभवाय) સર્વને સદા સુખી રાખવાવાળા છો. હું આપને (नमः) નમસ્કાર કરું છું. (शंकराय) મંગલકારી પ્રભુ, હું આપને નમન કરું છું. (मयस्कराय) સર્વને માટે મંગલ કરનાર (च) તથા (शिवाय) કલ્યાણકારી (च) તથા (शिवतराय) સર્વનું અધિકથી અધિક કલ્યાણ કરવાવાળા પરમેશ્વર, આપને નમસ્કાર કરું છું.

ભાવાર્થ : હે પરમાત્મા, સર્વનું કલ્યાણ કરો, હું આપને નમસ્કાર કરું છું.

ओ३म शान्तिः शान्तिः शान्तिः ।

इति सन्ध्योपासनविधिः ।

२. देव–यज्ञः

अथ ऋत्विग्वरणम्

यजमानोक्तिः– ओम् आवसोः सदने सीद।

ऋत्विगुक्तिः– ओं सीदामि।

यजमानोक्तिः– अहमद्योक्तकर्मकरणाय भवन्तं वृणे।

ऋत्विगुक्तिः– वृतोऽस्मि।

अथ संकल्पः

ओ३म् तत् सत् श्री ब्रह्मणो द्वितीये प्रहरार्ध्दे वैवश्वते मन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथम चरणे जम्बू–द्वीपे भरत–खण्डे आर्य्यावर्तैक देशान्तरगते .... राज्ये .... जनपदे .... नगरे, उत्तरा/दक्षिणा अयने, एकविंशत्यधिक्षत् उत्तर, एकोनपञ्चाशत्सहस्त्र उत्तर, एकोन त्रिशंत्लक्षोत्तर, सप्तनवतिकोटि उत्तर, एक – वृन्द – तमे सृष्टि अब्दे, सप्तसप्तति – उत्तर, द्वि सहस्त्रे .... वैक्रमे बर्षे सप्तनवति उत्तर एक शते .... दयानन्द बर्षे ....: ऋतौ .... मासे .... पक्षे .... तिथौ.......... बासरे।

अद्य अस्माभिः सन्ध्या–उपासनादिकं / बृहद्–यज्ञादिकं, शुभं कर्म क्रियते, तेन तृप्यतु भगवान्–यज्ञ देवः।

દક્ષિણાયન - ૨૨ જૂન થી ૨૨ ડિસેમ્બર તથા

ઉત્તરાયણ - ૨૩ ડિસેમ્બર થી ૨૧ જૂન

૧. હેમન્ત -	કારતક - માગશર	૪. ગ્રીષ્મ -	વૈશાખ - જેઠ
૨. શિશિર -	પોષ - મહા	૫. વર્ષા -	અષાઢ - શ્રાવણ
૩. વસંત -	ફાગણ - ચૈત્ર	૬. શરદ -	ભાદરવા -આસો

अथ आचमनमन्त्राः

નીચેનો એક-એક મંત્ર બોલી એક-એક આચમન કરવું.

ओम् अमृतोपस्तरणमसि स्वाहा ॥ १ ॥ इससे एक

(ओ३म्) હે ઈશ્વર, આપ (अमृत) જલ સમાન (उपस्तरणम्) આશ્રય-શાંતિ દેવાવાળા (असि) છો. આપ અમોને શાન્તિ પ્રદાન કરો. (स्वाहा) અમારો ભાવ સદા તે પ્રમાણે રહો.

ભાવાર્થ : હે ઈશ્વર, અમોને સદા આશ્રય અને શાંતિ આપો.

ओम् अमृतापिधानमसि स्वाहा ॥ २ ॥ इससे दूसरा

હે પરમેશ્વર, આપ અમને (अमृत) જલ સમાન (अपिधानम्) રક્ષણ પ્રદાન કરો. (स्वाहा) અમારો ભાવ સદા તે પ્રમાણે રહો.

ભાવાર્થ : હે પરમેશ્વર, અમારું રક્ષણ કરો.

ओं सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा ॥ ३ ॥

–तैत्तिरीय आरण्यक प्र० १० । अनु ० ३२ । ३५

હે પરમેશ્વર, આપ (सत्यं) સત્ય (यशः) યશ તથા (श्रीः) લક્ષ્મી (વિદ્યા, ધન, ઐશ્વર્ય આદિ) (मयि) મને (श्रीः श्रयतां) સદા પ્રાપ્ત કરાવો. (स्वाहा) અમારો ભાવ સદા તે પ્રમાણે રહો.

ભાવાર્થ : હે પરમેશ્વર, અમોને સદા સત્ય, યશ અને લક્ષ્મી પ્રાપ્ત થાઓ.

अथ अङ्गस्पर्शमन्त्राः

નીચેના મંત્રથી ડાબા હાથમાં જલ લઈતે જલમાં જમણા હાથની (મદયમાં અને અનામિકા આંગળીઓથી) નીચે લખ્યા અનુસાર અંગસ્પર્શ કરવો.

ओं वाङ् मऽआस्येऽस्तु । આ મંત્રથી મુખને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારા મુખમાં સદા પવિત્ર વાણી હો.

ओं नसोर्मे प्राणोऽस्तु । આ મંત્રથી નાસિકાનાં બન્ને છિદ્રોને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારી નાસિકામાં સદા પ્રાણ રહો.

ओम् अक्ष्णोर्मे चक्षुरस्तु । આ મંત્રથી બન્ને આંખોને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારા બન્ને નેત્રોમાં સદા જોવાની શકિત રહો.

ओं कर्णयोर्मे श्रोत्रमस्तु । આ મંત્રથી બન્ને કાનને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારા બન્ને કાનમાં સદા સાંભળવાની શકિત રહો.

ओं बाह्वोर्मे बलमस्तु । આ મંત્રથી બન્ને બાહુને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારે બન્ને ભુજામાં સદા બળ રહો.

ओम् ऊर्वोर्मऽओजोऽस्तु । આ મંત્રથી બન્ને સાથળોને સ્પર્શ કરો.

ભાવાર્થ : હે પરમેશ્વર, મારા બન્ને સાથળોમાં સદા શકિત રહો.

ओम् अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु ।

– पारस्करगृ० कण्डिका ३ । सू ० २५ ॥

આ મંત્રથી આખા શરીર પર જલ છાંટો.

ભાવાર્થ : હે ઇશ્વર, મારા તમામ અંગો રોગરહિત અને શરીર બળવાન રહો.

अथेश्वरस्तुतिप्रार्थनोपासना मन्त्राः

ओ३म्। विश्वानि देव सवितर्दुरितानि परा सुव।
यद् भद्रन्तन्न आ सुव॥ १॥ – यजु:० ३०। ३

अर्थ – हे (सवितः) सकल जगत् के उत्पत्तिकर्ता, समग्र ऐश्वर्ययुक्त (देव) शुद्धस्वरुप, सब सुखों के दाता परमेश्वर ! आप कृपा करके (नः) हमारे (विश्वानि) सम्पूर्ण (दुरितानि) दुर्गुण, दुर्व्यसन और दुःखों को (परा सुव) दूर कर दीजिए, (यत्) जो (भद्रम्) कल्याणकारक गुण, कर्म, स्वभाव और पदार्थ है, (तत्) वह सब हमको (आ सुव) प्राप्त कीजिए॥ १॥

ભાવાર્થ : હે પરમેશ્વર, અમારી સર્વ બુરાઈઓ દૂર કરો અને ભલાઈઓ પ્રાપ્ત કરાવો.

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवींद्यामुतेमांकस्मै देवाय हविषा विधेम॥ २॥
– यजुः० १३। ४

अर्थ – जो (हिरण्यगर्भः) स्वप्रकाशस्वरूप और जिसने प्रकाश करनेहारे सूर्य – चन्द्रमादि पदार्थ उत्पन्न करके धारण किये हैं, जो (भूतस्य) उत्पन्न हुए सम्पूर्ण जगत् का (जातः) प्रसिद्ध (पतिः) स्वामी (एकः) एक ही चेतनस्वरुप (आसीत्) था, जो (अग्रे) सब जगत् के उत्पन्न होने से पूर्व (समवर्त्तत) वर्तमान था, (सः) वह (इमाम्) इस (पृथिवीम्) भूमि (उत्) और (द्याम्) सूर्यादि को (दाधार) धारण कर रहा है, हम लोग उस (कस्मै) सुखस्वरूप (देवाय) शुद्ध परमात्मा के लिए (हविषा) ग्रहण करने योग्य योगाभ्यास और अतिप्रेम से (विधेम) विशेष भक्ति किया करें॥ २॥

ભાવાર્થ : સકળ સંસારના સ્વામી પરમેશ્વર, અમે સદા આપની ભક્તિમાં નિમગ્ન રહીએ.

य आत्मदा बलदा यस्य विश्वं उपासते प्रशिषं यस्य देवाः। यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ ३ ॥

– यजुः ० २५। १३

अर्थ – (यः) जो (आत्मदाः) आत्मज्ञान का दाता, (बलदाः) शरीर, आत्मा और समाज के बल का देनेहारा, (यस्य) जिसकी (विश्वे) सब (देवाः) विद्वान् लोग (उपासते) उपासना करते हैं और (यस्य) जिसका (प्रशिषम्) प्रत्यक्ष, सत्यस्वरुप शासन और न्याय अर्थात् शिक्षा को मानते हैं, (यस्य) जिसका आश्रय ही मोक्षसुखदायक है, जिसका न मानना, अर्थात् भक्ति न करना ही (मृत्युः) मृत्यु आदि दुःख का हेतु है, हम लोग उस (कस्मैं) सुखस्वरुप, (देवाय) सकल ज्ञान के देनेहारे परमात्मा की प्राप्ति के लिए (हविषा) आत्मा और अन्तः करण से (विधेम) भक्ति अर्थात् उसी की आज्ञा – पालन करने में तत्पर रहें ॥

ભાવાર્થ : હે બળદાતા પરમેશ્વર, અમો આપની આજ્ઞાનું પાલન કરતા રહીએ.

यः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव। य ईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ४ ॥

– यजुः ० २३। ३

अर्थ – (यः) जो (प्राणतः) प्राणवाले और (निमिषतः) अप्राणिरूप (जगतः) जगत् का (महित्वा) अपने अनन्त महिमा से (एकः इत्) एक ही (राजा) विराजमान राजा (बभूव) है, (यः) जो (अस्य) इस (द्विपदः) मनुष्यादि और (चतुष्पदः) गौ आदि प्राणियों के शरीर की (ईशे) रचना करता है, हम लोग उस (कस्मै) सुखस्वरुप (देवाय) सकलैश्वर्य के देनेवाले परमात्मा की उपासना अर्थात् (हविषा) अपनी सकल उत्तम सामग्री को उसकी आज्ञा – पालन में समर्पित करके (विधेम) भक्ति करें ॥ ४ ॥

ભાવાર્થ : હે સર્વના સ્વામી પરમેશ્વર, અમો હૃદયથી આપની ઉપાસના કરતા રહીએ.

येन॒ द्यौरु॒ग्रा पृ॑थि॒वी च॑ दृढा येन॒ स्व॒ स्तभि॒तं येन॒ नाक॑ः । योऽअ॒न्तरि॑क्षे॒ रज॑सो वि॒मान॒: कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ ५ ॥ – यजुः ० ३२ । ६

अर्थ – (येन) जिस परमात्मा ने (उग्रा) तीक्ष्ण स्वभाववाले (द्यौः) सूर्य आदि (च) और (पृथिवी) भूमि को (दृढा) धारण, और (येन) जिस जगदीश्वर ने (स्वः) सुख को (स्तभितम्) धारण और (येन)। जिस ईश्वर ने (नाकः) दुःखरहित मोक्ष को धारण किया है, (यः) जो (अन्तरिक्षे) आकाश में (रजसः) सब लोक – लोकान्तरों को (विमानः) विशेष मानयुक्त अर्थात् जैसे आकाश में पक्षी उड़ते हैं, वैसे सब लोकों का निर्माण करता और भ्रमण कराता है, हम लोग उस (कस्मै) सुखदायक (देवाय) कामना करने के योग्य परब्रह्म की प्राप्ति के लिए (हविषा) सब सामर्थ्य से (विधेम) विशेष भक्ति करें ॥ ५ ॥

ભાવાર્થ : સર્વ લોકલોકાન્તરને બનાવનાર અને તેને આકાશમાં વિમાનની પેઠે ચલાવનાર પ્રભુની અમો સાચા દિલથી સ્તુતિ કરતા રહીએ.

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒ताने॒ परि॒ ता ब॑भूव । यत्का॑मास्ते जुहु॒मस्तन्नो॑ ऽ अस्तु व॒यं स्या॑म॒ पत॑यो रयी॒णाम् ॥ ४ ॥ – ऋ० १० । १२१ । १०

अर्थ – हे (प्रजापते) सब प्रजा के स्वामी परमात्मन् (त्वत्) आपसे (अन्यः) भिन्न, दूसरा कोई (ता) उन, (एतानि) इन (विश्वा) सब (जातानि) उत्पन्न हुए जड़–चेतनादिकों को (न) नहीं (परि बभूव) तिरस्कार करता है, अर्थात् आप सर्वोपरि हैं। (यत्कामाः) जिस – जिस पदार्थ की कामनावाले

हम लोग (ते) आपका (जुहुमः) आश्रय लेवें और वाञ्छा करें, (तत्) उस – उसकी कामना (नः) हमारी (अस्तु) सिद्ध होवे, जिससे (वयम्) हम लोग (रणीयाम्) धनैश्वर्यों के (पतयः) स्वामी (स्याम) होवें ॥६॥

ભાવાર્થ : હે સર્વથી મહાન પરમેશ્વર, આ જડ અને ચેતન જગતમાં આપના કરતાં કોઈ મોટું નથી. અમે ધનવાન અને ઐશ્વર્યવાન થઈએ.

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥७॥

अर्थ – हे मनुष्यो ! (सः) वह परमात्मा (नः) अपने लोगों का (बन्धु) भ्राता के समान सुखदायक, (जनिता) सकल जगत् का उत्पादक, (सः) वह (विधाता) सब कामों का पूर्ण करनेवाला, (विश्वा) सम्पूर्ण लोकमात्र और(धामानि) नाम, स्थान, जन्मों को (वेद) जानता है और (यत्र) जिस (तृतीये) सांसारिक सुख-दुःख से रहित, नित्यानन्दयुक्त (धामन्) मोक्षस्वरुप धारण करनेवाले परमात्मा में (अमृतम्) मोक्ष को (आनशानाः) प्राप्त होके (देवाः) विद्वान् लोग (अध्यैरयन्त) स्वेच्छापूर्वक विचरते हैं, वही परमात्मा अपना गुरू, आचार्य, राजा और न्यायाधीश है, अपने लोग मिलके सदा उसकी भक्ति किया करें ॥७॥

ભાવાર્થ : હે સહાયક ઈશ્વર, અમોને મોક્ષની પ્રાપ્તિ કરાવો.

अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥८॥

अर्थ – हे (अग्ने) स्वप्रकाश, ज्ञानस्वरूप, सब जगत् के प्रकाशित करनेवाले, (देव) सकल सुखदाता परमेश्वर ! आप जिससे (विद्वान्) सम्पूर्ण विद्यायुक्त हैं, कृपा करके (अस्मान्) हम लोगों को (राये) विज्ञान वा राज्यादि ऐश्वर्य की प्राप्ति के लिए (सुपथा) अच्छे, धर्मयुक्त, आप्त लोगों के मार्ग से (विश्वानि) सम्पूर्ण (वयुनानि) प्रज्ञान और उत्तम कर्म (नय) प्राप्त कराइए और (अस्मत्) हमसे (जुहुराणम्) कुटिलतायुक्त (एनः) पापरूप कर्म को (युयोधि) दूर कीजिए। इस कारण हम लोग (ते) आपकी (भूयिष्ठाम्) बहुत प्रकार की स्तुतिरूप (नमः उक्तिम्) नम्रतापूर्वक प्रशंसा (विधेम) सदा किया करें और सर्वदा आनन्द में रहें ॥ ८॥

– यजु । ४० । १६

ભાવાર્થ : હે પૂર્ણ વિદ્વાન પરમેશ્વર, અમોને બૂરાં કર્મોથી બચાવીને આપની ભકિતમાં લગાડો.

इतीश्वरस्तुतिप्रार्थनोपासनाप्रकरणम्।

जन्मदिवस पर बालक को आशीर्वाद के मन्त्र

ओं शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।
शमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ १ ॥

– ऋ० १० । १६१ । ४ ॥ तु० अथर्व०– ३ । ११ । ४ ॥

ओं इन्द्रश्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥ २ ॥

– ऋ० २ । २१ । १६ ॥

यजमान को आशीर्वाद

उत्तिष्ठ ब्रह्मणस्पते देवान्यज्ञेन बोधय।
आयुः प्राणं प्रजां पशुं कीर्तिं यजमानम् च वर्धय ॥

– अथर्व वेद । १९ । ७ । ३५ ॥

अथ स्वस्तिवाचनम्

ओ३म् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १ ॥ — ऋ० १।१।१

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ २ ॥ — ऋ० १।१।९

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ ३ ॥ — ऋ० ५।५१।११

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ ४ ॥ — ऋ० ५।५१।१२

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ ५ ॥ — ऋ० ५।५१।१३

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ ६ ॥ — ऋ० ५।५१।१४

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव । पुनर्ददताघ्नता जानता सं गमेमहि ॥७॥ — ऋ० ५।५१।१५

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः । ते नो रासन्तामुरुगायमद्य युयं पात स्वस्तिभिः सदा नः ॥ ८ ॥ — ऋ० ७।३५।१५

येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदिं – तिरद्रिबर्हाः । उक्थशुष्मान् वृषभरान्त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥ ९ ॥ – ऋ० १० । ६३ । ३

नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्व – मानशुः। ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥ १० ॥ – ऋ० १० । ६३ । ४

सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम् । ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥ ११ ॥ – ऋ० १० । ६३ । ५

को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यतिष्ठन । को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥ १२ ॥ – ऋ० १० । ६३ । ६

येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः । त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥ १३ ॥ – ऋ० १० । ६३ । ७

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः । ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥ १४ ॥ – ऋ० १० । ६३ । ८

भरेष्विन्द्रं सुहवं हवामहेऽहोमुचं सुकृतं दैव्यं जनम्।अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥ १५ ॥ – ऋ० १० । ६३ । ९

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् । दैवीं नावं स्वरित्रामनागसमस्त्रवन्तीमा रुहेमा स्वस्तये ॥ १६ ॥ – ऋ० १० । ६३ । १०

विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः । सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥ १७ ॥ – ऋ० १० । ६३ । ११

अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रा-मघायतः। आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥ १८ ॥ – ऋ० १० । ६३ । १२

अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मण-स्परि । यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ॥ १९ ॥ – ऋ० १० । ६३ । १३

यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने । प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ॥ २० ॥ – ऋ० १० । ६३ । १४

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति । स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥ २१ ॥ – ऋ० १० । ६३ । १५

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति । सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥ २२ ॥ – ऋ० १० । ६३ । १६

इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजा-वतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघशꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ॥ २३ ॥ – यजुः ० १ । १

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽ

अपरितासऽउद्भिदः । देवा नो यथा सदमिद्वृधेऽ -
असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ २४ ॥ - यजुः० २५।१४

देवानां भद्रा सुमतिर्ऋजूयतां देवानां ꣳ रातिरभि नो निवर्तताम् । देवानां ꣳ सख्यमुपसेदिमा वयं देवा नऽ आयुः प्रतिरन्तु जीवसे ॥ २५ ॥ - यजुः० २५।१५

तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ २६ ॥ - यजुः० २५।१८

स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्व-वेदाः। स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ २७ ॥ - यजुः० २५।१९

भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २८ ॥ - यजुः० २५।२१

२ ३ १ २ ३ १ २ ३ २ ३ १ २
अग्न आ याहि वीतये गृणानो हव्यदातये ।
१ २र ३ १ २
नि होता सत्सि बर्हिषि ॥ २९ ॥ - साम०पू०१।१।१

१ २ ३ २ ३ २ ३ १ २ ३ २
त्वमग्ने यज्ञानां होता विश्वेषां हितः ।
३ २ ३ १ २ ३ १ २
देवेभिर्मानुषे जने ॥ ३० ॥ - साम०पू०१।१।२

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ॥ ३१ ॥
- अथर्व० १।१।१

इति स्वस्तिवाचनम्

अथ शान्तिकरणम्

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा
वाजसातौ ॥ १ ॥ – ऋ० ७ । ३५ । १

शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु
सन्तु रायः । शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा
पुरुजातो अस्तु ॥ २ ॥ – ऋ० ७ । ३५ । २

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु
स्वधाभिः । शं रोदसी बृहती शं नो अद्रिः शं नो देवानां
सुहवानि सन्तु ॥ ३ ॥ – ऋ० ७ । ३५ । ३

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना
शम् । शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि
वातु वातः ॥ ४ ॥ – ऋ० ७ । ३५ । ४

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु
जिष्णुः ॥ ५ ॥ – ऋ० ७ । ३५ । ५

शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह
शृणोतु ॥ ६ ॥ – ऋ० ७ । ३५ । ६

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु

यज्ञाः । शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व१ः शम्वस्तु वेदिः ॥ ७ ॥ – ऋ० ७ । ३५ । ७

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्त्रः प्रदिशो भवन्तु । शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥ ८ ॥ – ऋ० ७ । ३५ । ८

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥ ९ ॥ – ऋ० ७ । ३५ । ९

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः । शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः ॥ १० ॥ – ऋ० ७ । ३५ । १०

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु। शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ ११ ॥ – ऋ० ७ । ३५ । ११

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः। शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥ १२ ॥ – ऋ० ७ । ३५ । १२

शं नो अज एकपाद् देवो अस्तु शं नोऽहिर्बुधन्य१ः शं समुद्रः । शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥ १३ ॥ – ऋ० ७ । ३५ । १३

इन्द्रो विश्वस्य राजति ।
शन्नोऽअस्तु द्विपदे शं चतुष्पदे ॥ १४ ॥ – यजुः० ३६ । ८

शन्नो वातः पवताᳪ᳭शन्नस्तपतु सूर्य्यः। शन्नः कनिक्रदद्
देवः पर्जन्योऽअभि वर्षतु ॥ १५ ॥ – यजुः० ३६।१०

अहानि शम्भवन्तु नः शᳪ᳭ रात्रीः प्रति धीयताम्। शन्न
इन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या। शन्न
इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय
शँयोः ॥ १६ ॥ – यजुः० ३६।११

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।
शँयोरभिस्रवन्तु नः ॥ १७ ॥ – यजुः० ३६।१२

द्यौः शान्तिरन्तरिक्षᳪ᳭ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वे देवाः
शान्तिर्ब्रह्म शान्तिः सर्वᳪ᳭ शान्तिः शान्तिरेव शान्तिः सा
मा शान्तिरेधि ॥ १८ ॥ – यजुः० ३६।१७

तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः
शतं जीवेम शरदः शतᳪ᳭ शृणुयाम शरदः शतम्प्र –
ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः
शतात् ॥ १९ ॥ – यजुः० ३६।२४

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्प –
मस्तु ॥ २० ॥ – यजुः० ३४।१

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्प –
मस्तुः ॥ २१ ॥ – यजुः० ३४।२

यत्प्रज्ञानमुत चेतो धृतिश्च यज्जोतिरन्तरमृतम्प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिव-संकल्पमस्तु ॥ २२ ॥ – यजुः ० ३४ । ३

येनेदम्भूतं भुवनम्भविष्यत् परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥ २३ ॥

– यजुः ० ३४ । ४

यस्मिन्नृचः साम यजुꣳषि यस्मिन् प्रतिष्ठिता रथनाभा-विवाराः । यस्मिँश्चित्तँ सर्वमोतम्प्रजानां तन्मे मनः शिव-संकल्पमस्तु ॥ २४ ॥ – यजुः ० ३४ । ५

सुषारथिरश्वानिव यन्मनुष्यान् नेनीयतेऽभीशुभिर्वा-जिनऽइव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिव -संकल्पमस्तु ॥ २५ ॥ – यजुः ० ३४ । ६

स नः पवस्व शं गवे शं जनाय शमर्वते ।
शं राजन्नोषधीभ्यः ॥ २६ ॥ – साम० उत्तरा० १ । १ । ३

अभयं नः करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे । अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु ॥ २७ ॥ – अथर्व० १९ । १५ । ५

अभयं मित्रादभयममित्रादभयं ज्ञातादभयं परोक्षात् । अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥ २८ ॥

– अथर्व० १९ । १५ । ६

॥ इति शान्तिकरणम् ॥

बृहद्यज्ञः

अग्न्याधानम्

જીચેનો મન્ત્ર બોલી બ્રાહ્મણ, ક્ષત્રિય અથવા વૈશ્યના ઘેરથી અગ્નિ લાવી અથવા ઘીનો દીવો કરી કપૂરથી અગ્નિ પ્રકટાવી કોઇ એક પાત્રમાં નાની સમિધા રાખી અગ્નિ પ્રકટ કરી યજમાને અથવા પુરોહિતે બન્ને હાથમાં પાત્ર લઇ યજ્ઞકુંડમાં અગ્નિ પ્રદિપ્ત કરવો.

अग्न्याधानमन्त्रः

ओं भूर्भुवः स्वः । — गोभिलगृह्य० १।१।११

ओं भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥

— यजुः० ३।५

इस मन्त्र से वेदी के बीच में अग्नि को धर, उसपर छोटे-छोटे काष्ठ और थोड़ा कपूर धर, निम्न मन्त्र पढ़के व्यजन=पंखे से अग्नि को प्रदीप्त करे –

अग्निसमिन्धनम्

ओम् उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयं च। अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥ – यजु० १५।५४

जब अग्नि समिधाओं मे प्रविष्ट होने लगे तब चन्दन की अथवा पलाश आदि की आठ – आठ अंगुल की तीन समिधाएँ घृत में डुबा, उनमें से एक-एक निकाल निम्नलिखत मन्त्रों से एक – एक समिधा को अग्नि में आहुति दें –

अथ समिदाधानस्य चत्वारः मन्त्राः

નીચેના મન્ત્રથી એક સમિધાની આહુતિ આપવી.

ओम् अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्म-वर्चसेनान्नाद्येन समेधय स्वाहा॥ इदमग्नये जातवेदसे – इदन्न मम॥ १॥

इस मन्त्र से पहली समिधा चढ़ाएँ।

નીચેના બે મન્ત્રોથી એક સમિધાની આહુતિ આપવી.

ओं समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन॥ इससे और

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे स्वाहा। इदमग्नये जातवेदसे – इदन्न मम॥

– यजु० ३।१–२

इन दोनों मन्त्रों से दूसरी समिधा चढ़ाएँ।

નીચેના મન્ત્રથી એક સમિધાની આહુતિ આપવી.

तन्त्वा' स॒मिद्भिरङ्गिरो घृतेन॑ वर्द्धयामसि । बृहच्छोचा यविष्ठ्य॒ स्वाहा॑। इदमग्नयेऽङ्गिरसे – इदन्न मम ॥

– यजु:० ३ । ३

इस मन्त्र से तीसरी समिधा की आहुति देवें।

નીચેના મન્ત્રથી પાંચ વખત ઘીની આહુતિ આપવી.

पंचघृताहुति – मन्त्र :

क्रमशः इस मंत्र से पाँच बार घी की आहुती दे।

ओम् अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्च – सेनान्नाद्येन समेधय स्वाहा ॥ इदमग्नये जातवेदसे – इदन्न मम ॥ – आश्व० गृह्य० १ । १० । १२

નીચેના મન્ત્રોથી વેદીની ચારે બાજુ જલસિંચન કરવું.

[1]जल – प्रसेचन – मन्त्रा :

ओम् अदितेऽनुमन्यस्व ॥ આ મન્ત્રથી પૂર્વમાં

ओम् अनुमतेऽनुमन्यस्व ॥ આ મન્ત્રથી પશ્ચિમમાં

ओं सरस्वत्यनुमन्यस्व ॥ આ મન્ત્રથી ઉત્તરમાં

– गोभि० गृह्य० १ । ३ । १ – ३

१ जल छिड़कने की विधि ऐसी है, पूर्व में – दक्षिण से उत्तर की ओर, पश्चिम में – दक्षिण से उत्तर की ओर., उत्तर में – पश्चिम से पूर्व की ओर तथा देव सवितः' मन्त्र से पूर्व से आरम्भ करके वेदी के चारों ओर जल छिड़कना चाहिए।

ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ – यजु० ३०।१

નીચેના બે મન્ત્રથી લખ્યા પ્રમાણે દિશામાં ઘીની આહુતિ આપવી.

आघारावाज्यभागाहुतय :

ओम् अग्नये स्वाहा । इदमग्नये – इदन्न मम ॥

(આ મન્ત્રથી વેદીના ઉત્તર ભાગમાં અગ્નિમાં ઘીની આહુતિ આપવી.)

ओम् सोमाय स्वाहा ॥ इदं सोमाय इदन्न मम ।

– यजु० १०।५

(આ મન્ત્રથી વેદીના દક્ષિણ ભાગમાં અગ્નિમાં ઘીની આહુતિ આપવી.)

નીચેના બે મન્ત્રથી વેદીની મધ્યમાં ઘીની આહુતિ આપવી.

आज्यभागाहुतिमन्त्रः

ओम् प्रजापतये स्वाहा ॥ इदं प्रजापतये – इदन्न मम ॥

ओम् इन्द्राय स्वाहा ॥ इदमिन्द्राय – इदन्न मम ॥

प्रातः कालीन प्रधाम होमः 'मुख्य होम'

ओं सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ १ ॥

ओं सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥ २ ॥

ओं ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ ३ ॥

– यजु० ३।१

---

१ अग्नि के उत्तर एवम् दक्षिण में क्रमशः पश्चिम भाग से पूर्व की ओर धारा रुप में आघार की आहुतियाँ देनी चाहिए।

ओं सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा ॥ ४ ॥ - यजु :० ३ । १०

ओं भूरग्नये प्राणाय स्वाहा । इदमग्नये प्राणाय - इदन्न मम ॥ १ ॥

ओं भुवर्वायवेऽपानाय स्वाहा ॥ इदं वायवेऽपानाय- इदन्न मम ॥ २ ॥

ओं स्वरादित्याय व्यानाय स्वाहा । इदमादित्याय व्यानाय - इदन्न मम ॥ ३ ॥

ओं भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा ॥ इदमग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्य : इदन्न मम ॥ ४ ॥

ओम् आपो ज्योति रसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा ॥ ५ ॥

ओं यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥ ६ ॥ यजु० ३२ । १४

ओं विश्वानि देवसवितर्दुरितानि परा सुव । यद् भद्रन्तन्न आ सुव स्वाहा । यजु० ३० । ३

ओम् अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम स्वाहा ॥ यजु० ४० । १६

નોંધ : જો બન્ને સમય યજ્ઞ કરવો હોય તો ઉપરોકત આઠ આહુતિ આપ્યા બાદ ગાયત્રી મન્ત્રથી જેટલી ઇચ્છા હોય તેટલી આહુતિ

આપીને सर्वं वै पूर्णं स्वाहा ની ત્રણ આહુતિ આપીને પ્રાતઃ યજ્ઞ સમાપ્ત કરવો અને સાયંકાળ યજ્ઞ કરતી વખતે સંધ્યાથી શરૂ કરી આધારાવાજ્યભાગાહુતિ સુધી યજ્ઞ કરી, પ્રાતઃ કાળની જગ્યાએ સાયંકાળના મુખ્ય હોમના ચાર મન્ત્રોથી આહુતિ આપવી અને ત્યારબાદ ઉપરોકત આઠ આહુતિ બાદ ગાયત્રી મન્ત્ર બોલી જેટલી આહુતિ આપવા ઈચ્છા હોય તેટલી આહુતિ આપ્યા બાદ ओ३म सर्वं वै पूर्णं स्वाहा ની ત્રણ આહુતિ આપી યજ્ઞ સમાપ્ત કરવો.

જો બન્ને સમયનો યજ્ઞ એક જ સમયે કરવો હોય તો નિમ્ન મન્ત્રથી સાયંકાળના યજ્ઞની આહુતિ આપી યજ્ઞ સમાપ્ત કરવો.

सायंकालीन – होममन्त्रा : (आहिताग्निहोमः)

अब नीचे लिखे मन्त्र सायंकाल में अग्निहोत्र के जानो –

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ १ ॥ – यजु० ३ । ९
ओम् अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा ॥ २ ॥ – यजु० ३ । ९

નીચેના મન્ત્ર મનમાં બોલી આહુતિ આપવી.

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ ३ ॥ – यजु० ३ । ९

ओम् सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या ।
जुषाणोऽअग्निर्वेतु स्वाहा ॥ ४ ॥ – यजु० ३ । १०

ओं भूरग्नये प्राणाय स्वाहा ॥ १ ॥
ओं भुवर्वायवेऽपानाय स्वाहा ॥ २ ॥
ओं स्वरादित्याय व्यानाय स्वाहा ॥ ३ ॥ – यजु० ३ । १

ओं भूर्भुवः स्वरग्निवाय्वादितेभ्यः प्राणापानव्यानेभ्यः स्वाहा ॥ ४ ॥

ओम् आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा ॥ ५ ॥

(૧) જો દૈનિક યજ્ઞ કરવો હોય તો નીચેના મન્ત્રોથી આહુતિ આપી યજ્ઞની પૂર્ણાહુતિ કરવી.

નીચેના મન્ત્રથી ત્રણ વખત આહુતિ આપવી.

ओ३म् । भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ यजु० ३६ । ३

નીચેના મન્ત્રથી ભાત અથવા ઘીની આહુતિ આપવી

ओं सर्वं वै पूर्ण ँ स्वाहा ॥

१ सामग्री की आहुति केवल प्रातः और सायंकालीन मन्त्रों से देनी है। शेष सब घृत - आहुतियाँ हैं। हाँ, यदि गायत्री अथवा 'विश्वानि देव' मन्त्र से अधिक आहुतियाँ देनी हों तो घृत के साथ सामग्री की आहुतियाँ भी दी जानी चाहिएँ।

पूर्णाहुति – प्रकरणम् :

વિશેષ પ્રસંગો પર તથા સાપ્તાહિક સત્સંગોમાં પૃષ્ઠ ૪૩માં આપો ज्योति मन्त्र થી આહુતિ આપ્યા બાદ નીચેના મન્ત્રોથી બૃહદ યજ્ઞ કરવો :

आघारावाज्याहुतिमन्त्र :

નીચેના બે મન્ત્ર થી લખ્યા પ્રમાણે ઘીની આહુતિ આપવી.

ओम् अग्नये स्वाहा ॥ इदमग्नये – इदन्न मम ॥

(આ મન્ત્રથી વેદીના ઉત્તર ભાગમાં અગ્નિમાં ઘીની આહુતિ આપવી)

ओं सोमाय स्वाहा । इदं सोमाय – इदन्न मम ॥

– गो० गृ० १।८।२४

(આ મન્ત્રથી વેદીના દક્ષિણ ભાગમાં અગ્નિમાં ઘીની આહુતિ આપવી.)

નીચેના બે મન્ત્રથી વેદીના મધ્યમાં ઘીની આહુતિ આપવી.

आज्यभागाहुतिमन्त्रा :

ओं प्रजापतये स्वाहा । इदं प्रजापतये – इदन्न मम ॥

ओम् इन्द्राय स्वाहा ॥ इदमिन्द्राय – इदन्न मम ॥

व्याहृत्याहुतिमन्त्रा :

ओं भूरग्नये स्वाहा । इदमग्नये – इदन्न मम ॥ १ ॥

ओं भुवर्वायवे स्वाहा । इदं वायवे – इदन्न मम ॥ २ ॥

ओं स्वरादित्याय स्वाहा ॥ इदमादित्याय – इदन्न मम ॥ ३ ॥

ओं भूर्भुवः स्वरग्निवाय्वादित्येभ्य : स्वाहा ॥ इदमग्नि – वाय्वादित्येभ्यः– इदन्न मम ॥ ४ ॥

स्विष्टकृदाहुतिमन्त्र :

ओं यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद् विद्यात् सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धय स्वाहा ॥ इदमग्नये स्विष्टकृते – इदन्न मम ॥

– आश्व० १।१०।२२, शतपथ ब्रा० १४।९।४।२४॥

